ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, ह॒रि॒ः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

# पद पाठः (वाक्य सहित)

# तृतीयकाण्डे द्वितीयः प्रश्नः

**Notes:**

- **Please refer to the book "TS Kandam 1" and "TS 1.1 pada paadam with Vaakyam" for notes and conventions used in this Compilation.**
- **Please download our vedic compilations from our web site www.vedavms.in**

**Version 1.0** **October 31, 2020**

## Version Notes:

**This is now the current Version 1.0 dated October 31, 2020.**

1. This replaces the earlier version 0.0 dated July 31, 2019.

2. This version has been updated with the errors found and reported till Oct 15, 2020.

3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.

## Earlier Versions

| | | |
|---|---|---|
| 1st | Version Number | 0.0 dated 31st January 2019 |
| 2nd | Version Number | 0.0 dated 31st July 2019 |

## Table of Contents

3 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायं पद पाठे तृतीयं काण्डं ........ 4

3.2 तृतीयकाण्डे द्वितीयः प्रश्नः – पवमानग्राहादीनां व्याख्यानं ........ 4

ओं नमः परमात्मने, श्री महागणपतये नमः, श्री गुरुभ्यो नमः

हरिः ओं

# 3 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायं

# पद पाठे तृतीयं काण्डं

## 3.2 तृतीयकाण्डे द्वितीयः प्रश्नः – पवमानग्राहादीनां व्याख्यानं

**TS 3.2.1.1**

यो वै पवमानाना–मन्वारोहान् विद्वान् यजतेऽनु पवमानाना रोहति

न पवमानेभ्यो–ऽव च्छिद्यते श्येनोऽसि गायत्रछन्दा अनु त्वाऽऽरभे

स्वस्ति मा सं पारय सुपर्णोऽसि त्रिष्टुप्छन्दा अनु त्वा ऽऽ रभे स्वस्ति

मा सं पारय सघाऽसि जगतीछन्दा अनु त्वा ऽऽ रभे स्वस्ति मा

सं पारयेत्याहैते– [ ] 1

**TS 3.2.1.1 - Padam**

यः । वै । पवमानानाम् । अन्वारोहानित्यनु – आरोहान् । विद्वान् ।

यजते । अन्विति । पवमानान् । एति । रोहति । न । पवमानेभ्यः ।

अवेति । छिद्यते । श्येनः । असि । गायत्रछन्दा इति गायत्र–छन्दाः ।

अन्विति । त्वा । एति । रभे । स्वस्ति । मा । समिति । पारय ।

सुपर्ण इति सु – पर्णः । असि । त्रिष्टुप्छन्दा इति त्रिष्टुप् – छन्दाः ।

अन्विति । त्वा । एति । रभे । स्वस्ति । मा । समिति । पारय ।

सघा । असि । जगतीछन्दा इति जगती – छन्दाः । अन्विति ।

त्वा । एति । रभे । स्वस्ति । मा । समिति । पारय । इति ।

आह । एते । **1 (50)**

**TS 3.2.1.2**

वै पवमानाना–मन्वारोहास्तान्. य एवं ँविद्वान्. यजतेऽनु पवमानाना

रोहति न पवमानेभ्यो ऽवच्छिद्यते यो वै पवमानस्य सन्ततिं

ँवेद सर्वमायुरेति न पुरा ऽऽयुषः प्र मीयते पशुमान् भवति विन्दते

प्रजां पवमानस्य ग्रहा गृह्यन्तेऽथ वा अस्यैतेऽगृहीता द्रोणकलश

आधवनीयः पूतभृत् तान् यदगृहीत्वोपाकुर्यात् पवमानं ँवि – [ ] **2**

**TS 3.2.1.2 - Padam**

वै । पवमानानाम् । अन्वारोहा इत्यनु – आरोहाः । तान् । यः ।

एवम् । विद्वान् । यजते । अन्विति । पवमानान् । एति । रोहति ।

न । पवमानेभ्यः । अवेति । छिद्यते । यः । वै । पवमानस्य ।
सन्ततिमिति सं - ततिम् । वेद । सर्वम् । आयुः । एति । न । पुरा ।
आयुषः । प्रेति । मीयते । पशुमानिति पशु-मान् । भवति । विन्दते ।
प्रजामिति प्र - जाम् । पवमानस्य । ग्रहाः । गृह्यन्ते । अथ । वै ।
अस्य । एते । अगृहीताः । द्रोणकलश इति द्रोण - कलशः ।
आधवनीय इत्या - धवनीयः । पूतभृदिति पूत-भृत् । तान् । यत् ।
अगृहीत्वा । उपाकुर्यादित्युप - आकुर्यात् । पवमानम् ।
वीति । **2 (50)**

**<u>TS 3.2.1.3</u>**

च्छिन्द्यात् तं ँविच्छिद्यमान-मद्ध्वर्योः प्राणोऽनु वि च्छिद्ये-
तोपयामगृहीतोऽसि प्रजापतये त्वेति द्रोणकलशमभि मृशेदिन्द्राय
त्वेत्याधवनीयं ँविश्वेभ्यस्त्वा देवेभ्य इति पूतभृतं पवमानमेव तथ्
सं तनोति सर्वमायुरेति न पुरा ऽऽयुषः प्रमीयते पशुमान् भवति
विन्दते प्रजां ॥ **3**

**TS 3.2.1.3 - Padam**

छिन्द्यात् । तम् । विच्छिद्यमानमिति वि – छिद्यमानम् । अद्ध्वर्योः । प्राण इति प्र –अनः । अनु । वीति । छिद्येत । उपयामगृहीत इत्युपयाम – गृहीतः । असि । प्रजापतय इति प्रजा–पतये । त्वा । इति । द्रोणकलशमिति द्रोण – कलशम् । अभीति । मृशेत् । इन्द्राय । त्वा । इति । आधवनीयमित्या – धवनीयम् । विश्वेभ्यः । त्वा । देवेभ्यः । इति । पूतभृतमिति पूत–भृतम् । पवमानम् । एव । तत् । समिति । तनोति । सर्वम् । आयुः । एति । न । पुरा । आयुषः । प्रेति । मीयते । पशुमानिति पशु – मान् । भवति । विन्दते । प्रजामिति प्र – जाम् ॥ **3 (42)**

*(एते – वि – द्विचत्वारिꣳशच्च) (A1)*

**TS 3.2.2.1**

त्रीणि वाव सवनान्यथ तृतीयꣳ सवन–मव–लुम्पन्त्यनꣳशु कुर्वन्त उपाꣳशुꣳहुत्वोपाꣳशुपात्रेऽꣳशुमवास्य तन्तृतीयसवने ऽपिसृज्याभि षुणुयाद् यदाप्याययति तेनाꣳशुमद् यदभिषुणोति तेनर्जीषि सर्वाण्येव

तथ् सवनान्य॒ꣳशुमन्ति शुक्रवन्ति समावद्वीर्याणि करोति द्वौ समुद्रौ

विततावजूर्यौ पर्यावर्तेते जठरेव पादाः ।

तयोः पश्यन्तो अति यन्त्यन्यमपश्यन्तः – [ ] **4**

**<u>TS 3.2.2.1 - Padam</u>**

त्रीणि । वाव । सवनानि । अथ । तृतीयम् । सवनम् । अवेति ।

लुंपन्ति । अन॒ꣳशु । कुर्वन्तः । उपा॒ꣳशुमित्युप – अ॒ꣳशुम् ।

हुत्वा । उपा॒ꣳशुपात्र इत्युपा॒ꣳशु – पात्रे । अ॒ꣳशुम् ।

अवास्येत्यव – अस्य । तम् । तृतीयसवन इति तृतीय – सवने ।

अपिसृज्येत्यपि – सृज्य । अभीति । सुनुयात् । यत् ।

आप्याययतीया – प्याययति । तेन । अ॒ꣳशुमदित्य॒ꣳशु–मत् । यत् ।

अभिषुणोतीत्यभि–सुनोति । तेन । ऋजीषि । सर्वाणि । एव । तत् ।

सवनानि । अ॒ꣳशुमन्तीत्य॒ꣳशु – मन्ति । शुक्रवन्तीति

शुक्र – वन्ति । समावद्वीर्याणीति समावत् – वीर्याणि । करोति ।

द्वौ । समुद्रौ । वितताविति वि – ततौ । अजूर्यौ ।

पर्यावर्तेते इति परि–आवर्तेते । जठरा । इव । पादाः ॥ तयोः ।

पश्यन्तः । अतीति । यन्ति । अन्यम् । अपश्यन्तः । **4 (50)**

**TS 3.2.2.2**

सेतुनाऽति यन्त्यन्यं ॥

द्वे द्रधसी सतती वस्त एकः केशी विश्वा भुवनानि विद्वान् ।

तिरोधायैत्यसितं ँवसानः शुक्रमा दत्ते अनुहाय जार्यै ॥

देवा वै यद्यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा एतं

महायज्ञमपश्यन् तमतन्वताग्निहोत्रं ँव्रतमकुर्वत तस्माद् द्विव्रतः

स्याद् द्विर्. ह्यग्निहोत्रं जुह्वति पौर्णमासं ँयज्ञमग्नीषोमीयं – [ ] **5**

**TS 3.2.2.2 - Padam**

सेतुना । अतीति । यन्ति । अन्यम् ॥ द्वे इति । द्रधसी इति ।

सतती इति स – तती । वस्ते । एकः । केशी । विश्वा । भुवनानि ।

विद्वान् ॥ तिरोधायेति तिरः – धाय । एति । असितम् । वसानः ।

शुक्रम् । एति । दत्ते । अनुहायेत्यनु – हाय । जार्यै ॥ देवाः ।

वै । यत् । यज्ञे । अकुर्वत । तत् । असुराः । अकुर्वत । ते । देवाः ।

एतम् । महायज्ञमिति महा – यज्ञम् । अपश्यन्न् । तम् । अतन्वत ।
अग्निहोत्रमित्यग्नि – होत्रम् । व्रतम् । अकुर्वत । तस्मात् ।
द्विव्रत इति द्वि – व्रतः । स्यात् । द्विः । हि ।
अग्निहोत्रमित्यग्नि – होत्रम् । जुह्वति ।
पौर्णमासमिति पौर्ण – मासम् । यज्ञम् ।
अग्नीषोमीयमित्यग्नी – सोमीयम् । **5 (50)**

**<u>TS 3.2.2.3</u>**

पशुमकुर्वत दाश्यँ यज्ञमाग्नेयं पशुमकुर्वत वैश्वदेवं प्रातस्सवन – मकुर्वत वरुणप्रघासान् माद्ध्यन्दिन॒ सवन॒ साकमेधान् पितृयज्ञं त्र्यम्बका॒–स्तृतीयसवनमकुर्वत तमेषामसुरा यज्ञमन्ववाजिगा॒सन् तं नाऽन्ववायन् तेऽब्रुवन्नद्ध्वर्तव्या वा इमे देवा अभूवन्निति तदद्ध्वरस्याऽद्ध्वरत्वं ततो देवा अभवन् पराऽसुरा य एवं विद्वान्थ् सोमेन यजते भवत्यात्मना परा ( ) ऽस्य भ्रातृव्यो भवति ॥ **6**

**TS 3.2.2.3 - Padam**

पशुम् । अकुर्वत । दाश्यर्म् । यज्ञम् । आग्नेयम् । पशुम् ।
अकुर्वत । वैश्वदेवमिति वैश्व – देवम् । प्रातस्सवनमिति
प्रातः – सवनम् । अकुर्वत । वरुणप्रघासानिति वरुण – प्रघासान् ।
माद्ध्यन्दिनम् । सवनम् । साकमेधानिति साक – मेधान् ।
पितृयज्ञमिति पितृ – यज्ञं । त्र्यंबकानिति त्रि – अंबकान् ।
तृतीयसवनमिति तृतीय – सवनम् । अकुर्वत । तम् । एषाम् ।
असुराः । यज्ञम् । अन्ववाजिगाꣳसन्नित्यनु–अवाजिगाꣳसन्न् । तम् ।
न । अन्ववायन्नित्यनु–अवायन्न् । ते । अब्रुवन्न् । अद्ध्वर्तव्याः । वै ।
इमे । देवाः । अभूवन्न् । इति । तत् । अद्ध्वरस्य ।
अद्ध्वरत्वमित्यद्ध्वर – त्वम् । ततः । देवाः । अभवन्न् । परेति ।
असुराः । यः । एवम् । विद्वान् । सोमेन । यजते । भवति ।
आत्मना । परेति ( ) । अस्य । भ्रातृव्यः । भवति ॥ **6 (53)**

*(अपश्यन्तोऽ – ग्नीषोमीय – मात्मना परा – त्रीणि च) (A2)*

**TS 3.2.3.1**

परिभूरग्निं परिभूरिन्द्रं परिभूर्विश्वान् देवान् परिभूर्मा᳚ सह

ब्रह्मवर्चसेन स नः पवस्व शं गवे शं जनाय शमर्वते श᳚

राजन्नोषधीभ्यो ऽच्छिन्नस्य ते रयिपते सुवीर्यस्य रायस्पोषस्य

ददितारः स्याम ।

तस्य मे रास्व तस्य ते भक्षीय तस्य त इदमुन्मृजे ॥

प्राणाय मे वर्चोदा वर्चसे पवस्वापानाय व्यानाय वाचे – [ ] 7

**TS 3.2.3.1 - Padam**

परिभूरिति परि – भूः । अग्निम् । परिभूरिति परि – भूः । इन्द्रम् ।

परिभूरिति परि – भूः । विश्वान् । देवान् । परिभूरिति परि – भूः ।

माम् । सह । ब्रह्मवर्चसेनेति ब्रह्म – वर्चसेन । सः । नः । पवस्व ।

शम् । गवे । शम् । जनाय । शम् । अर्वते । शम् । राजन्न् ।

ओषधीभ्य इत्योषधि – भ्यः । अच्छिन्नस्य । ते । रयिपत इति

रयि – पते । सुवीर्यस्येति सु – वीर्यस्य । रायः । पोषस्य ।

ददितारः । स्याम ॥ तस्य । मे । रास्व । तस्य । ते । भक्षीय ।

तस्य । ते । इदम् । उदिति । मृजे ॥ प्राणायेति प्र –अनाय । मे ।

वर्चोदा इति वर्चः – दाः । वर्चसे । पवस्व ।

अपानायेत्यप – अनाय । व्यानायेति वि – अनाय । वाचे । **7 (50)**

**TS 3.2.3.2**

दक्षक्रतुभ्यां चक्षुर्भ्यां मे वर्चोदौ वर्चसे पवेथा७ श्रोत्राया ऽऽ*त्मने

ऽङ्गेभ्य आयुषे वीर्याय विष्णोरिन्द्रस्य विश्वेषां देवानां जठरमसि

वर्चोदा मे वर्चसे पवस्व कोऽसि को नाम कस्मै त्वा काय त्वा

यं त्वा सोमेनातीतृपं यं त्वा सोमेनामीमद७ सुप्रजाः प्रजया

भूयास७ सुवीरो वीरैः सुवर्चा वर्चसा सुपोषः पोषै–र्विश्वेभ्यो

मे रूपेभ्यो वर्चोदा– [ ] **8**

**TS 3.2.3.2 - Padam**

दक्षक्रतुभ्यामिति दक्षक्रतु – भ्याम् । चक्षुर्भ्यामिति चक्षुः – भ्याम् ।

मे । वर्चोदाविति वर्चः–दौ । वर्चसे । पवेथाम् । श्रोत्राय । आत्मने ।

अङ्गेभ्यः । आयुषे । वीर्याय । विष्णोः । इन्द्रस्य । विश्वेषाम् ।

देवानाम् । जठरम् । असि । वर्चोदा इति वर्चः–दाः । मे । वर्चसे ।

पवस्व । कः । असि । कः । नाम । कस्मै । त्वा । काय । त्वा ।

यम् । त्वा । सोमेन । अतीतृपम् । यम् । त्वा । सोमेन । अमीमदम् ।
सुप्रजा इति सु – प्रजाः । प्रजयेति प्र – जया । भूयासम् ।
सुवीर इति सु – वीरः । वीरैः । सुवर्चा इति सु – वर्चाः ।
वर्चसा । सुपोष इति सु – पोषः । पोषैः । विश्वेभ्यः । मे ।
रूपेभ्यः । वर्चोदा इति वर्चः – दाः । **8 (50)**

**<u>TS 3.2.3.3</u>**

वर्चसे पवस्व तस्य मे रास्व तस्य ते भक्षीय तस्य त इदमुन्मृजे ॥
बुभूषन्नवेक्षेतैष वै पात्रियः प्रजापतिर्यज्ञः प्रजापतिस्तमेव तर्पयति
स एनं तृप्तो भूत्वाऽभि पवते ब्रह्मवर्चसकामोऽवेक्षेतैष
वै पात्रियः प्रजापतिर्यज्ञः प्रजापतिस्तमेव तर्पयति स एनं तृप्तो
ब्रह्मवर्चसेनाभि पवत आमयाव्य – [ ] **9**

**<u>TS 3.2.3.3 - Padam</u>**

वर्चसे । पवस्व । तस्य । मे । रास्व । तस्य । ते । भक्षीय । तस्य ।
ते । इदम् । उदिति । मृजे ॥ बुभूषन्न् । अवेति । ईक्षेत । एषः । वै ।
पात्रियः । प्रजापतिरिति प्रजा – पतिः । यज्ञः । प्रजापतिरिति
प्रजा – पतिः । तम् । एव । तर्पयति । सः । एनम् । तृप्तः । भूत्वा ।

अभीति । पवते । ब्रह्मवर्चसकाम इति ब्रह्मवर्चस–कामः । अवेति ।
ईक्षेत । एषः । वै । पात्रियः । प्रजापतिरिति प्रजा – पतिः । यज्ञः ।
प्रजापतिरिति प्रजा – पतिः । तम् । एव । तर्पयति । सः । एनम् ।
तृप्तः । ब्रह्मवर्चसेनेति ब्रह्म – वर्चसेन । अभीति । पवते ।
आमयावी । **9 (50)**

**TS 3.2.3.4**

वेक्षेतैष वै पात्रियः प्रजापतिर्यज्ञः प्रजापतिस्तमेव तर्पयति स एनं
तृप्त आयुषाऽभि पवतेऽभिचरन्नवेक्षेतैष वै पात्रियः प्रजापतिर्यज्ञः
प्रजापतिस्तमेव तर्पयति स एनं तृप्तः प्राणापानाभ्यां ँवाचो
दक्षक्रतुभ्यां चक्षुर्भ्या७ श्रोत्राभ्या–मात्मनोऽङ्गेभ्य
आयुषोऽन्तरेति ताजक् प्र धन्वति ॥ **10**

**TS 3.2.3.4 - Padam**

अवेति । ईक्षेत । एषः । वै । पात्रियः । प्रजापतिरिति प्रजा–पतिः ।
यज्ञः । प्रजापतिरिति प्रजा – पतिः । तम् । एव । तर्पयति । सः ।
एनम् । तृप्तः । आयुषा । अभीति । पवते ।

अभिचरन्नित्यभि – चरन्न् । अवेति । ईक्षेत । एषः । वै । पात्रियः । प्रजापतिरिति प्रजा – पतिः । यज्ञः । प्रजापतिरिति प्रजा – पतिः । तम् । एव । तर्पयति । सः । एनम् । तृप्तः । प्राणापानाभ्यामिति प्राण – अपानाभ्याम् । वाचः । दक्षक्रतुभ्यामिति दक्षक्रतु – भ्याम् । चक्षुर्भ्यामिति चक्षुः – भ्याम् । श्रोत्राभ्याम् । आत्मनः । अङ्गेभ्यः । आयुषः । अन्तः । एति । ताजक् । प्रेति । धन्वति ॥ **10 (45)**

*(वाचे–रूपेभ्यो वर्चोदा – आमयावी – पञ्चचत्वारिꣳशच्च) (A3)*

**TS 3.2.4.1**

स्फ्यः स्वस्तिर्विघनः स्वस्तिः पर्.शुर्वेदिः परशुर्नः स्वस्तिः । यज्ञिया यज्ञकृतः स्थ ते माऽस्मिन्. यज्ञ उप ह्वयद्ध्वमुप मा द्यावापृथिवी ह्वयेतामुपाऽऽ*स्तावः कलशः सोमो अग्निरुप देवा उप यज्ञ उप मा होत्रा उपहवे ह्वयन्तां नमोऽग्नये मखघ्नेमखस्य मा यशोऽर्यादित्याहवनीयमुप तिष्ठते यज्ञो वै मखो – [ ] **11**

**TS 3.2.4.1 - Padam**

स्फ्यः । स्वस्तिः । विघन इति वि – घनः । स्वस्तिः । पर्.शुः । वेदिः । परशुः । नः । स्वस्तिः ॥ यज्ञियाः । यज्ञकृत इति

यज्ञ–कृतः । स्थ । ते । मा । अस्मिन्न् । यज्ञे । उपेति । ह्वयद्ध्वम् । उपेति । मा । द्यावापृथिवी इति द्यावा–पृथिवी । ह्वयेताम् । उपेति । आस्ताव इत्या – स्तावः । कलशः । सोमः । अग्निः । उपेति । देवाः । उपेति । यज्ञः । उपेति । मा । होत्राः । उपहव इत्युप–हवे । ह्वयन्ताम् । नमः । अग्नये । मखघ्न इति मख–घ्ने । मखस्य । मा । यशः । अर्यात् । इति । आहवनीयमित्या – हवनीयम् । उपेति । तिष्ठते । यज्ञः । वै । मखः । **11 (50)**

**TS 3.2.4.2**

यज्ञं ँवाव स तदहन् तस्मा एव नमस्कृत्य सदः प्रसर्पत्यात्मनोऽनार्त्यै नमो रुद्राय मखघ्ने नमस्कृत्या मा पाहीत्याग्नीद्ध्रं तस्मा एव नमस्कृत्य सदः प्र सर्पत्यात्मनोऽनार्त्यै नम इन्द्राय मखघ्न इन्द्रियं मे वीर्यं मा निर्वधीरिति होत्रीयमाशिषमेवैतामा शास्तइन्द्रियस्य वीर्यस्यानिर्घाताय या वै – [ ] **12**

## TS 3.2.4.2 - Padam

यज्ञम् । वाव । सः । तत् । अहन्न् । तस्मै । एव । नमस्कृत्येति

नमः – कृत्य । सदः । प्रेति । सर्पति । आत्मनः । अनार्त्यै । नमः ।

रुद्राय । मखघ्न इति मख – घ्ने । नमस्कृत्येति नमः–कृत्या । मा ।

पाहि । इति । आग्नीद्ध्रमित्याग्नि – इद्ध्रम् । तस्मै । एव ।

नमस्कृत्येति नमः – कृत्य । सदः । प्रेति । सर्पति । आत्मनः ।

अनार्त्यै । नमः । इन्द्राय । मखघ्न इति मख – घ्ने । इन्द्रियम् । मे ।

वीर्यम् । मा । निरिति । वधीः । इति । होत्रीयम् ।

आशिषमित्या – शिषम् । एव । एताम् । एति । शास्ते । इन्द्रियस्य ।

वीर्यस्य । अनिर्घातायेत्यनिः – घाताय । याः । वै । **12 (50)**

## TS 3.2.4.3

देवताः सदस्यार्तिमार्पयन्ति यस्ता विद्वान् प्रसर्पति न

सदस्यार्तिमार्च्छति नमोऽग्नये मखघ्न इत्याहैता वै देवताः

सदस्यार्तिमाऽर्पयन्ति ता य एवं ँविद्वान् प्रसर्पति न सदस्यार्तिमार्च्छति

दृढे स्थः शिथिरे समीची माऽ७्हसस्पात७् सूर्यो मा देवो

दिव्याद७्हसस्पातु वायुरन्तरिक्षा – [ ] **13**

**TS 3.2.4.3 - Padam**

देवताः । सदसि । आर्तिम् । आर्पयन्तीत्या – अर्पयन्ति । यः ।
ताः । विद्वान् । प्रसर्पतीति प्र – सर्पति । न । सदसि । आर्तिम् ।
एति । ऋच्छति । नमः । अग्नये । मखघ्न इति मख – घ्ने । इति ।
आह । एताः । वै । देवताः । सदसि । आर्तिम् । एति । अर्पयन्ति ।
ताः । यः । एवम् । विद्वान् । प्रसर्पतीति प्र – सर्पति । न । सदसि ।
आर्तिम् । एति । ऋच्छति । दृढे इति । स्थः । शिथिरे इति ।
समीची इति । मा । अꣳहसः । पातम् । सूर्यः । मा । देवः ।
दिव्यात् । अꣳहसः । पातु । वायुः । अन्तरिक्षात् । **13 (50)**

**TS 3.2.4.4**

दग्निः पृथिव्या यमः पितृभ्यः सरस्वती मनुष्येभ्यो देवी द्वारौ मा मा
सं ताप्तं नमः सदसे नमः सदसस्पतये नमः सखीनां पुरोगाणां
चक्षुषे नमो दिवे नमः पृथिव्या अहे दैधिषव्योदतस्तिष्ठाऽन्यस्य सदने
सीद योऽस्मत् पाकतर उन्निवत उदुद्वतश्च गेषं पातं मा द्यावापृथिवी
अद्याह्नः सदो वै प्रसर्पन्तं – [ ] **14**

**TS 3.2.4.4 - Padam**

अग्निः । पृथिव्याः । यमः । पितृभ्य इति पितृ – भ्यः । सरस्वती ।
मनुष्येभ्यः । देवी इति । द्वारौ । मा । मा । समिति । ताप्तम् । नमः ।
सदसे । नमः । सदसः । पतये । नमः । सखीनाम् । पुरोगाणामिति
पुरः – गानाम् । चक्षुषे । नमः । दिवे । नमः । पृथिव्यै । अहे ।
दैधिषव्य । उदिति । अतः । तिष्ठ । अन्यस्य । सदने । सीद । यः ।
अस्मत् । पाकतर इति पाक – तरः । उदिति ।
निवत इति नि–वतः । उदिति । उद्वत इत्युत् – वतः । च । गेषम् ।
पातम् । मा । द्यावापृथिवी इति द्यावा – पृथिवी । अद्य ।
अह्नः । सदः । वै । प्रसर्पन्तमिति प्र – सर्पन्तम् । **14 (50)**

**TS 3.2.4.5**

पितरोऽनु प्र सर्पन्ति त एनमीश्वरा हिꣳसितोः सदः प्रसृप्य
दक्षिणार्द्धं परेक्षेताऽगन्त पितरः पितृमानहं ँयुष्माभिर्भूयासꣳ
सुप्रजसो मया यूयं भूयास्तेति तेभ्य एव नमस्कृत्य सदः
प्र सर्पत्यात्मनोऽनार्त्यै ॥ **15**

**TS 3.2.4.5 - Padam**

पितरः । अनु । प्रेति । सर्पन्ति । ते । एनम् । ईश्वराः । हिꣳसितोः ।

सदः । प्रसृप्येति प्र – सृप्य । दक्षिणार्द्धमिति दक्षिण – अर्द्धम् ।

परेति । ईक्षेत । एति । अगन्त । पितरः । पितृमानिति पितृ – मान् ।

अहम् । युष्माभिः । भूयासम् । सुप्रजस इति सु–प्रजसः । मया ।

यूयम् । भूयास्त । इति । तेभ्यः । एव । नमस्कृत्येति नमः–कृत्य ।

सदः । प्रेति । सर्पति । आत्मनः । अनार्त्यै ॥ **15 (33)**

*(मखो – वा – अन्तरिक्षात् – प्रसर्पन्तं – त्रयस्त्रिꣳशच्च) (A4)*

**TS 3.2.5.1**

भक्षेहि मा ऽऽ विश दीर्घायुत्वाय शन्तनुत्वाय रायस्पोषाय

वर्चसे सुप्रजास्त्वायेहि वसो पुरोवसो प्रियो मे हृदोऽस्यश्विनोस्त्वा

बाहुभ्याꣳ सघ्यासं नृचक्षसं त्वा देव सोम सुचक्षा अव ख्येषं

मन्द्रा ऽभिभूतिः केतुर्यज्ञानां ँवाग्जुषाणा सोमस्य तृप्यतु मन्द्रा

स्वर्वाच्यदिति–रनाहतशीर्ष्णी वाग्जुषाणा सोमस्य तृप्यत्वेहि

विश्वचर्.षणे – [ ] **16**

**TS 3.2.5.1 - Padam**

भक्ष । एति । इहि । मा । एति । विश । दीर्घायुत्वायेति

दीर्घायु – त्वाय । शन्तनुत्वायेति शन्तनु – त्वाय । रायः । पोषाय ।

वर्चसे । सुप्रजास्त्वायेति सुप्रजाः–त्वाय । एति । इहि । वसो इति ।

पुरोवसो इति पुरः – वसो । प्रियः । मे । हृदः । असि । अश्विनोः ।

त्वा । बाहुभ्यामिति बाहु– भ्याम् । सध्यासम् । नृचक्षसमिति

नृ – चक्षसम् । त्वा । देव । सोम । सुचक्षा इति सु – चक्षाः ।

अवेति । ख्येषम् । मन्द्रा । अभिभूतिरित्यभि – भूतिः । केतुः ।

यज्ञानाम् । वाक् । जुषाणा । सोमस्य । तृप्यतु । मन्द्रा । स्वर्वाचीति

सु – अर्वाची । अदितिः । अनाहतशीर्ष्णीत्यनाहत – शीर्ष्णी ।

वाक् । जुषाणा । सोमस्य । तृप्यतु । एति । इहि ।

विश्वचर्.षण इति विश्व – चर्.षणे । **16 (50)**

**TS 3.2.5.2**

शम्भूर्मयोभूः स्वस्ति मा हरिवर्ण प्र चर क्रत्वे दक्षाय रायस्पोषाय

सुवीरतायै मा मा राजन् वि बीभिषो मा मे हार्दि त्विषा वधीः ।

वृषणे शुष्मायाऽऽयुषे वर्चसे ॥

वसुमद्गणस्य सोम देव ते मतिविदः प्रातस्सवनस्य गायत्रछन्दस
इन्द्रपीतस्य नराश॒ंसपीतस्य पितृपीतस्य मधुमत उपहूतस्योपहूतो
भक्षयामि रुद्रवद्गणस्य सोम देव ते मतिविदो माद्ध्यन्दिनस्य
सवनस्य त्रिष्टुप्छन्दस इन्द्रपीतस्य नराश॒ंसपीतस्य – [ ] 17

**TS 3.2.5.2 - Padam**

शंभूरिति शं – भूः । मयोभूरिति मयः – भूः । स्वस्ति । मा ।
हरिवर्णेति हरि – वर्ण । प्रेति । चर । क्रत्वे । दक्षाय । रायः ।
पोषाय । सुवीरताया इति सु–वीरतायै । मा । मा । राजन्न् । वीति ।
बीभिषः । मा । मे । हार्दि । त्विषा । वधीः ॥ वृषणे । शुष्माय ।
आयुषे । वर्चसे ॥ वसुमद्गणस्येति वसुमत् – गणस्य । सोम ।
देव । ते । मतिविद इति मति – विदः । प्रातस्सवनस्येति
प्रातः – सवनस्य । गायत्रछन्दस इति गायत्र – छन्दसः ।
इन्द्रपीतस्येतीन्द्र – पीतस्य । नराश॒ंसपीतस्येति
नराश॒ंस – पीतस्य । पितृपीतस्येति पितृ – पीतस्य । मधुमत इति
मधु – मतः । उपहूतस्येत्युप – हूतस्य । उपहूत इत्युप – हूतः ।

भक्षयामि । रुद्रवद्गणस्येति रुद्रवत् - गणस्य । सोम । देव । ते ।
मतिविद इति मति - विदः । माद्ध्यन्दिनस्य । सवनस्य ।
त्रिष्टुप्छन्दस इति त्रिष्टुप् - छन्दसः । इन्द्रपीतस्येतीन्द्र - पीतस्य ।
नराश॒ꣳसपीतस्येति नराश॒ꣳस - पीतस्य । **17 (50)**

**TS 3.2.5.3**

पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयाम्यादित्यवद्गणस्य
सोम देव ते मतिविदस्तृतीयस्य सवनस्य जगतीछन्दस इन्द्रपीतस्य
नराश॒ꣳसपीतस्य पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामि ॥
आ प्यायस्व समेतु ते विश्वतः सोम वृष्णियं ।
भवा वाजस्य सङ्गथे ॥
हिन्व मे गात्रा हरिवो गणान् मे मा वितीतृषः ।
शिवो मे सप्तर्.षीनुप तिष्ठस्व मा मेऽवाङ्नाभिमति - [ ] **18**

**TS 3.2.5.3 - Padam**

पितृपीतस्येति पितृ - पीतस्य । मधुमत इति मधु - मतः ।
उपहूतस्येत्युप - हूतस्य । उपहूत इत्युप - हूतः । भक्षयामि ।
आदित्यवद्गणस्येत्यादित्यवत् - गणस्य । सोम । देव । ते ।

मतिविद इति मति – विदः । तृतीयस्य । सवनस्य । जगतीछन्दस इति जगती – छन्दसः । इन्द्रपीतस्येतीन्द्र – पीतस्य । नराशꣳसपीतस्येति नराशꣳस – पीतस्य । पितृपीतस्येति पितृ – पीतस्य । मधुमत इति मधु – मतः । उपहूतस्येत्युप – हूतस्य । उपहूत इत्युप–हूतः । भक्षयामि ॥ एति । प्यायस्व । समिति । एतु । ते । विश्वतः । सोम । वृष्णियम् ॥ भव । वाजस्य । सङ्गथ इति सं – गथे ॥ हिन्व । मे । गात्रा । हरिव इति हरि – वः । गणान् । मे । मा । वीति । तीतृषः ॥ शिवः । मे । सप्तर्.षीनिति सप्त–ऋषीन् । उपेति । तिष्ठस्व । मा । मे । अवाङ् । नाभिम् । अतीति । **18 (50)**

**<u>TS 3.2.5.4</u>**

गाः ॥

अपाम सोमममृता अभूमाऽदर्श्म ज्योतिरविदाम देवान् ।
किमस्मान् कृणवदरातिः किमु धूर्तिरमृत मर्त्यस्य ॥
यन्म आत्मनो मिन्दा ऽभूदग्निस्तत् पुनरा ऽहार्जातवेदा विचर्.षणिः ॥

पुनरग्निश्चक्षुरदात्–पुनरिन्द्रो बृहस्पतिः ।

पुनर्मे अश्विना युवं चक्षुरा धत्तमक्ष्योः ॥

इष्टयजुषस्ते देव सोम स्तुतस्तोमस्य – [ ] **19**

**TS 3.2.5.4 - Padam**

गाः ॥ अपाम । सोमम् । अमृताः । अभूम । अदश्र्म । ज्योतिः ।

अविदाम । देवान् ॥ किम् । अस्मान् । कृणवत् । अरातिः । किम् ।

उ । धूर्तिः । अमृत । मर्त्यस्य ॥ यत् । मे । आत्मनः । मिन्दा ।

अभूत् । अग्निः । तत् । पुनः । एति । अहाः । जातवेदा इति

जात – वेदाः । विचर्.षणिरिति वि – चर्.षणिः ॥ पुनः । अग्निः ।

चक्षुः । अदात् । पुनः । इन्द्रः । बृहस्पतिः ॥ पुनः । मे । अश्विना ।

युवम् । चक्षुः । एति । धत्तम् । अक्ष्योः ॥ इष्टयजुष इतीष्ट–यजुषः ।

ते । देव । सोम । स्तुतस्तोमस्येति स्तुत – स्तोमस्य । **19 (50)**

**TS 3.2.5.5**

शस्तोक्थस्य हरिवत इन्द्रपीतस्य मधुमत उपहूतस्योपहूतो

भक्षयामि ॥

आपूर्याः स्थाऽऽमा पूरयत प्रजया च धनेन च ॥

एतत् ते तत ये च त्वामन्वेतत् ते पितामह प्रपितामह ये च त्वामन्वत्र पितरो यथाभागं मन्ददध्वं नमो वः पितरो रसाय नमो वः पितरः शुष्माय नमो वः पितरो जीवाय नमो वः पितरः – [ ] **20**

**TS 3.2.5.5 - Padam**

शस्तोक्थस्येति शस्त – उक्थस्य । हरिवत इति हरि – वतः । इन्द्रपीतस्येतीन्द्र – पीतस्य । मधुमत इति मधु – मतः । उपहूतस्येत्युप – हूतस्य । उपहूत इत्युप – हूतः । भक्षयामि ॥ आपूर्या इत्या – पूर्याः । स्थ । एति । मा । पूरयत । प्रजयेति प्र–जया । च । धनेन । च ॥ एतत् । ते । तत । ये । च । त्वाम् । अन्विति । एतत् । ते । पितामह । प्रपितामहेति प्र – पितामह । ये । च । त्वाम् । अन्विति । अत्र । पितरः । यथाभागमिति यथा–भागम् । मन्ददध्वम् । नमः । वः । पितरः । रसाय । नमः । वः । पितरः । शुष्माय । नमः । वः । पितरः । जीवाय । नमः । वः । पितरः । **20 (50)**

**TS 3.2.5.6**

स्वधायै नमो वः पितरो मन्यवे नमो वः पितरो घोराय पितरो नमो वो य एतस्मिन् ँल्लोकेस्थ युष्मा ँस्तेऽनु येऽस्मिन् ँल्लोके मां तेऽनु य एतस्मिन् ँल्लोके स्थ यूयं तेषां ँवसिष्ठा भूयास्त येऽस्मिन् ँल्लोकेऽहं तेषां ँवसिष्ठो भूयासं प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव । **21**

**TS 3.2.5.6 - Padam**

स्वधाया इति स्व – धायै । नमः । वः । पितरः । मन्यवे । नमः । वः । पितरः । घोराय । पितरः । नमः । वः । ये । एतस्मिन्न् । लोके । स्थ । युष्मान् । ते । अन्विति । ये । अस्मिन्न् । लोके । माम् । ते । अन्विति । ये । एतस्मिन्न् । लोके । स्थ । यूयम् । तेषाम् । वसिष्ठाः । भूयास्त । ये । अस्मिन्न् । लोके । अहम् । तेषाम् । वसिष्ठः । भूयासम् । प्रजापत इति प्रजा–पते । न । त्वत् । एतानि । अन्यः । विश्वा । जातानि । परीति । ता । बभूव ॥ **21 (50)**

**TS 3.2.5.7**

यत् कामास्ते जुहुमस्तन्नो अस्तु वय॰ स्याम पतयो रयीणां ॥

देवकृतस्यैनसो ऽवयजनमसि मनुष्यकृतस्यैनसो ऽवयजनमसि

पितृकृतस्यैनसो ऽवयजनमस्यफ्सु धौतस्य सोम देव ते नृभिः

सुतस्येष्टयजुषः स्तुतस्तोमस्य शस्तोक्थस्य यो भक्षोअश्वसनिर्यो

गोसनिस्तस्य ते पितृभिर्भक्षंकृतस्योपहूतस्योपहूतो

भक्षयामि ॥ **22**

**TS 3.2.5.7 - Padam**

यत्कामा इति यत् – कामाः । ते । जुहुमः । तत् । नः । अस्तु ।

वयम् । स्याम । पतयः । रयीणाम् ॥ देवकृतस्येति देव – कृतस्य ।

एनसः । अवयजनमित्यव – यजनम् । असि । मनुष्यकृतस्येति

मनुष्य – कृतस्य । एनसः । अवयजनमित्यव – यजनम् । असि ।

पितृकृतस्येति पितृ – कृतस्य । एनसः ।

अवयजनमित्यव – यजनम् । असि । अफ्स्वित्यप्–सु । धौतस्य ।

सोम । देव । ते । नृभिरिति नृ – भिः । सुतस्य । इष्टयजुष इतीष्ट – यजुषः । स्तुतस्तोमस्येति स्तुत – स्तोमस्य । शस्तोक्थस्येति शस्त – उक्थस्य । यः । भक्षः । अश्वसनिरित्यश्व – सनिः । यः । गोसनिरिति गो – सनिः । तस्य । ते । पितृभिरिति पितृ – भिः । भक्षंकृतस्येति भक्षं – कृतस्य । उपहूतस्येत्युप – हूतस्य । उपहूत इत्युप – हूतः । भक्षयामि ॥ **22 (44)**

*(विश्वचर्.षणे – त्रिष्टुप्छन्दस इन्द्रपीतस्य नराशꣳसपीतस्या – ऽति –स्तुतस्तोमस्य – जीवाय नमो वः पितरो – बभूव – चतुश्चत्वारिꣳशच्च) (A5)*

**<u>TS 3.2.6.1</u>**

महीनां पयोऽसि विश्वेषां देवानां तनूर् ऋद्ध्यासमद्य पृषतीनां ग्रहं पृषतीनां ग्रहोऽसि विष्णोर्.हृदयमस्येकमिष विष्णुस्त्वाऽनु वि चक्रमे भूतिर्दद्ध्ना घृतेन वर्द्धतां तस्य मेष्टस्य वीतस्य द्रविणमा गम्याज्ज्योतिरसि वैश्वानरं पृश्ञियै दुग्धं ँयावती द्यावापृथिवी

महित्वा यावच्च सप्त सिन्धवो वितस्थुः ।

तावन्तमिन्द्र ते – [ ] 23

**TS 3.2.6.1 - Padam**

महीनाम् । पयः । असि । विश्वेषाम् । देवानाम् । तनूः । ऋद्ध्यासम् ।

अद्य । पृषतीनाम् । ग्रहम् । पृषतीनाम् । ग्रहः । असि । विष्णोः ।

हृदयम् । असि । एकम् । इष । विष्णुः । त्वा । अनु । वीति ।

चक्रमे । भूतिः । दद्ध्ना । घृतेन । वर्द्धताम् । तस्य । मा । इष्टस्य ।

वीतस्य । द्रविणम् । एति । गम्यात् । ज्योतिः । असि । वैश्वानरम् ।

पृश्ञियै । दुग्धम् । यावती इति । द्यावापृथिवी इति द्यावा–पृथिवी ।

महित्वेति महि – त्वा । यावत् । च । सप्त । सिन्धवः ।

वितस्थुरिति वि – तस्थुः ॥ तावन्तम् । इन्द्र । ते । 23 (50)

**TS 3.2.6.2**

ग्रहꣳ सहोर्जा गृह्णाम्यस्तृतं ॥

यत् कृष्णशकुनः पृषदाज्यमवमृशेच्छूद्रा अस्य प्रमायुकाः

स्युर्यच्छ्वा ऽवमृशेच्चतुष्पादोऽस्य पशवः प्रमायुकाः स्युर्यथ्

स्कन्देद् यजमानः प्रमायुकः स्यात् पशवो वै पृषदाज्यं पशवो वा

एतस्य स्कन्दन्ति यस्य पृषदाज्य७ स्कन्दति यत् पृषदाज्यं

पुनर्गृह्णाति पशूनेवास्मै पुनर्गृह्णाति प्राणो वै पृषदाज्यं

प्राणो वा – [ ] **24**

**TS 3.2.6.2 - Padam**

ग्रहम् । सह । ऊर्जा । गृह्णामि । अस्तृतम् ॥ यत् । कृष्णशकुन इति

कृष्ण – शकुनः । पृषदाज्यमिति पृषत् – आज्यम् ।

अवमृशेदित्यव – मृशेत् । शूद्राः । अस्य ।

प्रमायुका इति प्र – मायुकाः । स्युः । यत् । श्वा ।

अवमृशेदित्यव – मृशेत् । चतुष्पाद इति चतुः – पादः । अस्य । प

शवः । प्रमायुका इति प्र – मायुकाः । स्युः । यत् । स्कन्देत् ।

यजमानः । प्रमायुक इति प्र – मायुकः । स्यात् । पशवः । वै ।

पृषदाज्यमिति पृषत्–आज्यम् । पशवः । वै । एतस्य । स्कन्दन्ति ।

यस्य । पृषदाज्यमिति पृषत् – आज्यम् । स्कन्दति । यत् ।

पृषदाज्यमिति पृषत् – आज्यम् । पुनः । गृह्णाति । पशून् । एव ।

अस्मै । पुनः । गृह्णाति । प्राण इति प्र – अनः । वै । पृषदाज्यमिति पृषत् – आज्यम् । प्राण इति प्र – अनः । वै ॥ **24 (50)**

**TS 3.2.6.3**

एतस्य स्कन्दति यस्य पृषदाज्य॑ स्कन्दति यत् पृषदाज्यं पुनर्गृह्णाति प्राणमेवास्मै पुनर्गृह्णाति हिरण्यमवधाय गृह्णात्यमृतं ँवै हिरण्यं प्राणः पृषदाज्यममृतमेवास्य प्राणे दधाति शतमानं भवति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठत्यश्वमव घ्रापयति प्राजापत्यो वा अश्वः प्राजापत्यः प्राणः स्वादेवास्मै योनेः प्राणं ( ) निर्मिमीते वि वा एतस्य यज्ञश्छिद्यते यस्य पृषदाज्य॑ स्कन्दति वैष्णव्यर्चा पुनर्गृह्णाति यज्ञो वै विष्णुर्यज्ञेनैव यज्ञ॑ सं तनोति ॥ **25**

**TS 3.2.6.3 - Padam**

एतस्य । स्कन्दति । यस्य । पृषदाज्यमिति पृषत् – आज्यम् । स्कन्दति । यत् । पृषदाज्यमिति पृषत् – आज्यम् । पुनः । गृह्णाति । प्राणमिति प्र – अनम् । एव । अस्मै । पुनः । गृह्णाति । हिरण्यम् । अवधायेत्यव – धाय । गृह्णाति । अमृतम् । वै । हिरण्यम् । प्राण

इति प्र - अनः । पृषदाज्यमिति पृषत् - आज्यम् । अमृतम् । एव ।
अस्य । प्राण इति प्र - अने । दधाति । शतमानमिति शत-मानम् ।
भवति । शतायुरिति शत - आयुः । पुरुषः । शतेन्द्रिय इति
शत-इन्द्रियः । आयुषि । एव । इन्द्रिये । प्रतीति । तिष्ठति । अश्वम् ।
अवेति । घ्रापयति । प्राजापत्य इति प्राजा - पत्यः । वै । अश्वः ।
प्राजापत्य इति प्राजा - पत्यः । प्राण इति प्र-अनः । स्वात् । एव ।
अस्मै । योनेः । प्राणमिति प्र - अनम् ( ) । निरिति । मिमीते ।
वीति । वै । एतस्य । यज्ञः । छिद्यते । यस्य । पृषदाज्यमिति
पृषत् - आज्यम् । स्कन्दति । वैष्णव्या । ऋचा । पुनः । गृह्णाति ।
यज्ञः । वै । विष्णुः । यज्ञेन । एव । यज्ञम् । समिति ।
तनोति ॥ **25 (72)** *(ते - पृषदाज्यं प्राणो वै - योनेः प्राणं -
द्वाविꣳशतिश्च) (A6)*

**<u>TS 3.2.7.1</u>**

देव सवितरेतत् ते प्राऽऽ*ह तत् प्र च सुव प्र च यज बृहस्पतिर्ब्रह्मा
ऽऽयुष्मत्या ऋचो मा गात तनूपाथ् साम्नः सत्या व आशिषः सन्तु

सत्या आकूतय ऋतं च सत्यं च वदत स्तुत देवस्य सवितुः प्रसवे स्तुतस्य स्तुतमस्यूर्जं मह्य॑ स्तुतं दुहामा मा स्तुतस्य स्तुतं गम्याच्छस्त्रस्य शस्त्र – [ ] **26**

**TS 3.2.7.1 - Padam**

देव । सवितः । एतत् । ते । प्रेति । आह । तत् । प्रेति । च । सुव । प्रेति । च । यज । बृहस्पतिः । ब्रह्मा । आयुष्मत्याः । ऋचः । मा । गात । तनूपादिति तनू – पात् । साम्नः । सत्याः । वः । आशिष इत्या – शिषः । सन्तु । सत्याः । आकूतय इत्या–कूतयः । ऋतम् । च । सत्यम् । च । वदत । स्तुत । देवस्य । सवितुः । प्रसव इति प्र – सवे । स्तुतस्य । स्तुतम् । असि । ऊर्जम् । मह्यम् । स्तुतम् । दुहाम् । एति । मा । स्तुतस्य । स्तुतम् । गम्यात् । शस्त्रस्य । शस्त्रम् । **26 (50)**

**TS 3.2.7.2**

मस्यूर्जं मह्य॑ शस्त्रं दुहामा मा शस्त्रस्य शस्त्रं गम्यादिन्द्रियावन्तो वनामहे धुक्षीमहि प्रजामिषं ॥

सा मे सत्या ऽऽशीर्देवेषु भूयाद्-ब्रह्मवर्चसं मा ऽऽ गम्यात् ॥

यज्ञो बभूव स आ बभूव स प्र जज्ञे स वावृधे ।

स देवानामधि-पतिर्बभूव सो अस्माँ अधिपतीन् करोतु वयँ

स्याम पतयो रयीणां ॥

यज्ञो वा वै - [ ] **27**

**TS 3.2.7.2 - Padam**

असि । ऊर्जम् । मह्यम् । शस्त्रम् । दुहाम् । एति । मा । शस्त्रस्य ।

शस्त्रम् । गम्यात् । इन्द्रियावन्त इतीन्द्रिय - वन्तः । वनामहे ।

धुक्षीमहि । प्रजामिति प्र - जाम् । इषम् ॥ सा । मे । सत्या ।

आशीरित्या - शीः । देवेषु । भूयात् । ब्रह्मवर्चसमिति

ब्रह्म - वर्चसम् । मा । एति । गम्यात् ॥ यज्ञः । बभूव । सः ।

एति । बभूव । सः । प्रेति । जज्ञे । सः । वावृधे ॥ सः । देवानाम् ।

अधिपतिरित्यधि - पतिः । बभूव । सः । अस्मान् ।

अधिपतीनित्यधि - पतीन् । करोतु । वयम् । स्याम । पतयः ।

रयीणाम् ॥ यज्ञः । वा । वै । **27 (50)**

**TS 3.2.7.3**

यज्ञपतिं दुहे यज्ञपतिर्वा यज्ञं दुहे स यः स्तुतशस्त्रयोर्दोहमविद्वान्.

यजते तं ँयज्ञो दुहे स इष्ट्वा पापीयान् भवति य एनयोर्दोहं

ँविद्वान् यजते स यज्ञं दुहे स इष्ट्वा वसीयान् भवति स्तुतस्य

स्तुतमस्यूर्जं मह्य७ँ स्तुतं दुहामा मा स्तुतस्य स्तुतं

गम्याच्छस्त्रस्य शस्त्रमस्यूर्जं मह्य७ँ शस्त्रं दुहा ( ) मा मा

शस्त्रस्य शस्त्रं गम्यादित्याहैष वै स्तुतशस्त्रयोर्दोहस्तं

ँय एवं ँविद्वान्. यजते दुह एव यज्ञमिष्ट्वा वसीयान् भवति ॥ **28**

**TS 3.2.7.3 - Padam**

यज्ञपतिमिति यज्ञ – पतिम् । दुहे । यज्ञपतिरिति यज्ञ–पतिः । वा ।

यज्ञम् । दुहे । सः । यः । स्तुतशस्त्रयोरिति स्तुत – शस्त्रयोः ।

दोहम् । अविद्वान् । यजते । तम् । यज्ञः । दुहे । सः । इष्ट्वा ।

पापीयान् । भवति । यः । एनयोः । दोहम् । विद्वान् । यजते । सः ।

यज्ञम् । दुहे । सः । इष्ट्वा । वसीयान् । भवति । स्तुतस्य ।

स्तुतम् । असि । ऊर्जम् । मह्यम् । स्तुतम् । दुहाम् । एति । मा ।

स्तुतस्य । स्तुतम् । गम्यात् । शस्त्रस्य । शस्त्रम् । असि । ऊर्जम् ।
मह्यम् । शस्त्रम् । दुहाम् ( ) । एति । मा । शस्त्रस्य । शस्त्रम् ।
गम्यात् । इति । आह । एषः । वै । स्तुतशस्त्रयोरिति
स्तुत - शस्त्रयोः । दोहः । तम् । यः । एवम् । विद्वान् । यजते ।
दुहे । एव । यज्ञम् । इष्ट्वा । वसीयान् । भवति ॥ **28 (72)**

*(शस्त्रं - वँै - शस्त्रन्दुहां - द्वाविꣳशतिश्च) (A7)*

**TS 3.2.8.1**

श्येनाय पत्वने स्वाहा वट्थ्स्वयमभिगूर्ताय नमो विष्टम्भाय
धर्मणे स्वाहा वट्थ्स्वयमभिगूर्ताय नमः परिधये जनप्रथनाय स्वाहा
वट्थ्स्वयमभिगूर्ताय नम ऊर्जे होत्राणाꣳ स्वाहा वट्थ्स्वयमभिगूर्ताय
नमः पयसे होत्राणाꣳ स्वाहा वट्थ्स्वयमभिगूर्ताय नमः प्रजापतये
मनवे स्वाहा वट्थ्स्वयमभिगूर्ताय नम ऋतमृतपाः सुवर्वाट्थ्स्वाहा
वट्थ्स्वयमभिगूर्ताय नमस्तृंपन्ताꣳ होत्रा मधोर्घृतस्य यज्ञपतिमृषय
एनसा - [ ] **29**

**TS 3.2.8.1 - Padam**

श्येनाय । पत्वने । स्वाहा । वट् । स्वयमभिगूर्तायेति

स्वयं – अभिगूर्ताय । नमः । विष्टंभायेति वि – स्तंभाय । धर्मणे ।

स्वाहा । वट् । स्वयमभिगूर्तायेति स्वयं – अभिगूर्ताय । नमः ।

परिधय इति परि – धये । जनप्रथनायेति जन – प्रथनाय । स्वाहा ।

वट् । स्वयमभिगूर्तायेति स्वयं – अभिगूर्ताय । नमः । ऊर्जे ।

होत्राणाम् । स्वाहा । वट् । स्वयमभिगूर्तायेति स्वयं – अभिगूर्ताय ।

नमः । पयसे । होत्राणाम् । स्वाहा । वट् । स्वयमभिगूर्तायेति

स्वयं – अभिगूर्ताय । नमः । प्रजापतय इति प्रजा–पतये । मनवे ।

स्वाहा । वट् । स्वयमभिगूर्तायेति स्वयं – अभिगूर्ताय । नमः ।

ऋतम् । ऋतपा इत्यृत – पाः । सुवर्वाडिति सुवः – वाट् । स्वाहा ।

वट् । स्वयमभिगूर्तायेति स्वयं – अभिगूर्ताय । नमः । तृंपन्ताम् ।

होत्राः । मधोः । घृतस्य । यज्ञपतिमिति यज्ञ – पतिम् । ऋषयः ।

एनसा । **29 (50)**

**TS 3.2.8.2**

ऽऽहुः ।

प्रजा निर्भक्ता अनुतप्यमाना मधव्यौ स्तोकावप तौ रराध ॥

सं नस्ताभ्या(ग्ं) सृजतुविश्वकर्मा घोरा ऋषयो नमो अस्त्वेभ्यः ।

चक्षुष एषां मनसश्च सन्धौ बृहस्पतये महि षद् द्युमन्नमः ॥

नमो विश्वकर्मणे स उ पात्वस्माननन्यान्थ्–सोमपान् मन्यमानः ।

प्राणस्य विद्वान्थ् समरे न धीर एनश्चकृवान् महि बद्ध एषां ॥

तं ँविश्वकर्मन् – [ ] **30**

**TS 3.2.8.2 - Padam**

आहुः ॥ प्रजा इति प्र – जाः । निर्भक्ता इति निः – भक्ताः ।

अनुतप्यमाना इत्यनु–तप्यमानाः । मधव्यौ । स्तोकौ । अपेति । तौ ।

रराध ॥ समिति । नः । ताभ्याम् । सृजतु । विश्वकर्मेति

विश्व – कर्मा । घोराः । ऋषयः । नमः । अस्तु । एभ्यः ॥ चक्षुषः ।

एषाम् । मनसः । च । सन्धाविति सं – धौ । बृहस्पतये । महि ।

सत् । द्युमदिति द्यु – मत् । नमः ॥ नमः । विश्वकर्मण इति

विश्व – कर्मणे । सः । उ । पातु । अस्मान् । अनन्यान् ।

सोमपानिति सोम – पान् । मन्यमानः ॥ प्राणस्येति प्र – अनस्य ।
विद्वान् । समर इति सं–अरे । न । धीरः । एनः । चकृवान् । महि ।
बद्धः । एषाम् ॥ तम् । विश्वकर्मन्निति विश्व – कर्मन्न् । **30 (50)**

**TS 3.2.8.3**

प्र मुञ्चा स्वस्तये ये भक्षयन्तो न वसून्यानृहुः ।
यानग्नयोऽन्वतप्यन्त धिष्णिया इयं तेषामवया दुरिष्ट्यै स्विष्टिं नस्तां
कृणोतु विश्वकर्मा ॥
नमः पितृभ्यो अभि ये नो अख्यन् यज्ञकृतो यज्ञकामाः सुदेवा
अकामा वो दक्षिणां न नीनिम मा नस्तस्मादेनसः पापयिष्ट ।
यावन्तो वै सदस्यास्ते सर्वे दक्षिण्यास्तेभ्यो यो दक्षिणां न–[ ] **31**

**TS 3.2.8.3 - Padam**

प्रेति । मुञ्च । स्वस्तये । ये । भक्षयन्तः । न । वसूनि । आनृहुः ॥
यान् । अग्नयः । अन्वतप्यन्तेत्यनु – अतप्यन्त । धिष्णियाः । इयम् ।
तेषाम् । अवया । दुरिष्ट्या इति दुः – इष्ट्यै । स्विष्टिमिति
सु – इष्टिम् । नः । ताम् । कृणोतु । विश्वकर्मेति विश्व – कर्मा ॥

नमः । पितृभ्य इति पितृ – भ्यः । अभीति । ये । नः । अख्यन्न् ।
यज्ञकृत इति यज्ञ – कृतः । यज्ञकामा इति यज्ञ – कामाः ।
सुदेवा इति सु – देवाः । अकामाः । वः । दक्षिणाम् । न । नीनिम ।
मा । नः । तस्मात् । एनसः । पापयिष्ट ॥ यावन्तः । वै । सदस्याः ।
ते । सर्वे । दक्षिण्याः । तेभ्यः । यः । दक्षिणाम् । न । **31 (50)**

**TS 3.2.8.4**

नयेदैभ्यो वृश्च्येत यद्–वैश्वकर्मणानि जुहोति सदस्यानेव तत्
प्रीणात्यस्मे देवासो वपुषे चिकित्सत यमाशिरा दम्पती वाममश्ञुतः ।
पुमान् पुत्रो जायते विन्दते वस्वथ विश्वे अरपा एधते गृहः ॥
आशीर्दाया दम्पती वाममश्ञुतामरिष्टो रायः सचताꣳ समोकसा ।
य आऽसिचथ् सन्दुग्धं कुम्भ्या सहेष्टेन यामन्नमतिं जहातु सः ॥
सर्पिर्ग्रीवी – [ ] **32**

**TS 3.2.8.4 - Padam**

नयेत् । एति । एभ्यः । वृश्च्येत । यत् । वैश्वकर्मणानीति
वैश्व – कर्मणानि । जुहोति । सदस्यान् । एव । तत् । प्रीणाति ।

अस्मे इति । देवासः । वपुषे । चिकित्सत । यम् । आशिरा । दंपती

इति । वामम् । अश्नुतः ॥ पुमान् । पुत्रः । जायते । विन्दते । वसु ।

अथ । विश्वे । अरपाः । एधते । गृहः ॥ आशीर्दायेत्याशीः – दाया ।

दंपती इति । वामम् । अश्नुताम् । अरिष्टः । रायः । सचताम् ।

समोकसेति सं – ओकसा ॥ यः । एति । असिचत् ।

सन्दुग्धमिति सं – दुग्धम् । कुंभ्या । सह । इष्टेन । यामन्न् ।

अमतिम् । जहातु । सः ॥ सर्पिर्ग्रीवीति सर्पिः – ग्रीवी । **32 (50)**

**<u>TS 3.2.8.5</u>**

पीवर्यस्य जाया पीवानः पुत्रा अकृशासो अस्य ।

सहजानिर्यः सुमखस्यमान इन्द्राया ऽऽ*शिर॑ सह कुम्भ्या ऽदात् ॥

आशीर्म ऊर्जमुत सुप्रजास्त्वमिषं दधातु द्रविण॑ सवर्चसं ।

संजयन् क्षेत्राणि सहसाऽहमिन्द्र कृण्वानो अन्या॑ अधरान्थ्सपत्नान् ॥

भूतमसि भूते मा धा मुखमसि मुखं भूयासं द्यावापृथिवीभ्यां

त्वा परि गृह्णामि विश्वे त्वा देवा वैश्वानराः – [ ] **33**

**TS 3.2.8.5 - Padam**

पीवरी । अस्य । जाया । पीवानः । पुत्राः । अकृशासः । अस्य ॥

सहजानिरिति सह – जानिः । यः । सुमखस्यमान इति

सु – मखस्यमानः । इन्द्राय । आशिरम् । सह । कुंभ्या । अदात् ॥

आशीरित्या – शीः । मे । ऊर्जम् । उत । सुप्रजास्त्वमिति

सुप्रजाः – त्वम् । इषम् । दधातु । द्रविणम् ।

सवर्चसमिति स – वर्चसम् ॥ संजयन्निति सं – जयन्न् ।

क्षेत्राणि । सहसा । अहम् । इन्द्र । कृण्वानः । अन्यान् । अधरान् ।

सपत्नान् ॥ भूतम् । असि । भूते । मा । धाः । मुखम् । असि ।

मुखम् । भूयासम् । द्यावापृथिवीभ्यामिति द्यावा – पृथिवीभ्याम् ।

त्वा । परीति । गृह्णामि । विश्वे । त्वा । देवाः । वैश्वानराः । **33 (50)**

**TS 3.2.8.6**

प्र च्यावयन्तु दिवि देवान् दृ॒ꣳहान्तरिक्षे वया॒ꣳसि पृथिव्यां पार्थिवान्

ध्रुवं ध्रुवेण हविषाऽव सोमं नयामसि ।

यथा नः सर्वमिज्जगदयक्ष्म॒ꣳ सुमना असत् ।

यथा न इन्द्र इद्विशः केवलीः सर्वाः समनसः करत् ।
यथा नः सर्वा इद्दिशोऽस्माकं केवलीरसन्न् ॥ **34**

**TS 3.2.8.6 - Padam**

प्रेति । च्यावयन्तु । दिवि । देवान् । दृꣳह । अन्तरिक्षे । वयाꣳसि । पृथिव्याम् । पार्थिवान् । ध्रुवम् । ध्रुवेण । हविषा । अवेति । सोमम् । नयामसि ॥ यथा । नः । सर्वम् । इत् । जगत् । अयक्ष्मम् । सुमना इति सु – मनाः । असत् ॥ यथा । नः । इन्द्रः । इत् । विशः । केवलीः । सर्वाः । समनस इति स – मनसः । करत् ॥ यथा । नः । सर्वाः । इत् । दिशः । अस्माकम् । केवलीः । असन्न् ॥ **34 (40)** ***(एनसा – विश्वकर्मन् – यो दक्षिणां न – सर्पिर्ग्रीवी – वैश्वनरा – श्चत्वारिꣳशच्च) (A8)***

**TS 3.2.9.1**

यद्वै होताऽद्ध्वर्युमभ्याह्वयते वज्रमेनमभि प्र वर्तयत्युक्थशा इत्याह प्रातस्सवनं प्रतिगीर्य त्रीण्येतान्यक्षराणि त्रिपदा गायत्री गायत्रं प्रातस्सवनं गायत्रियैव प्रातस्सवने वज्रमन्तर्द्धत्त उक्थं ँवाचीत्याह

माद्ध्यन्दिन॒ꣳ॒ सवनं प्रति॒गीर्य च॒त्वार्ये॒ता॒न्यक्षरा॒णि चतुष्पदा त्रि॒ष्टुप्
त्रैष्टु॒भं माद्ध्यन्दिन॒ꣳ॒ सवनं त्रि॒ष्टुभै॒व माद्ध्यन्दि॒ने सव॒ने
वज्रम॒न्त धत्त–[ ] 35

**TS 3.2.9.1 - Padam**

यत् । वै । होता । अ॒द्ध्व॒र्युम् । अ॒भ्या॒ह्वय॒त इत्यभि – आ॒ह्वयते ।
वज्रम् । ए॒न॒म् । अ॒भि । प्रेति । व॒र्त॒य॒ति । उक्थश॒ा इत्युक्थ–श॒ाः ।
इति । आ॒ह॒ । प्रा॒त॒स्स॒व॒नमिति प्रातः – स॒व॒नम् ।
प्र॒ति॒गीर्येति प्रति – गीर्य । त्रीणि । ए॒तानि । अ॒क्षराणि ।
त्रि॒पदेति त्रि – पदा । गा॒य॒त्री । गा॒य॒त्रम् ।
प्रा॒त॒स्स॒व॒नमिति प्रातः – स॒व॒नम् । गा॒य॒त्रि॒या । ए॒व ।
प्रा॒त॒स्स॒व॒न इति प्रातः – स॒व॒ने । वज्रम् । अ॒न्तः । ध॒त्ते॒ । उ॒क्थम् ।
वा॒चि । इति । आ॒ह॒ । माद्ध्यन्दिनम् । सवनम् । प्र॒ति॒गीर्येति
प्रति – गीर्य । च॒त्वारि । ए॒तानि । अ॒क्षराणि । चतु॒ष्प॒दे॒ति
चतुः – प॒दा॒ । त्रि॒ष्टुप् । त्रैष्टुभम् । माद्ध्यन्दिनम् । सवनम् ।

त्रिष्टुभा । एव । माद्ध्यन्दिने । सवने । वज्रम् ।

अन्तः । धत्ते । **35 (50)**

**TS 3.2.9.2**

उक्थं ँवाचीन्द्रायेत्याह तृतीयसवनं प्रतिगीर्य सप्तैतान्यक्षराणि

सप्तपदा शक्वरी शाक्वरो वज्रो वज्रेणैव तृतीयसवने वज्रमन्त र्धत्ते

ब्रह्मवादिनो वदन्ति स त्वा अद्ध्वर्युः स्याद्यो यथासवनं प्रतिगरे

छन्दा॑ꣳसि सम्पादयेत् तेजः प्रातः सवन आत्मन् दधीतेन्द्रियं

माद्ध्यन्दिने सवने पशू॒ꣳ स्तृतीयसवन इत्युक्थशा इत्याह

प्रातस्सवनं प्रतिगीर्य त्रीण्येतान्यक्षराणि – [ ] **36**

**TS 3.2.9.2 - Padam**

उक्थम् । वाचि । इन्द्राय । इति । आह । तृतीयसवनमिति

तृतीय –सवनम् । प्रतिगीर्येति प्रति – गीर्य । सप्त । एतानि ।

अक्षराणि । सप्तपदेति सप्त – पदा । शक्वरी । शाक्वरः । वज्रः ।

वज्रेण । एव । तृतीयसवन इति तृतीय – सवने । वज्रम् । अन्तः ।

धत्ते । ब्रह्मवादिन इति ब्रह्म – वादिनः । वदन्ति । सः । तु । वै ।

अध्वर्युः । स्यात् । यः । यथासवनमिति यथा - सवनम् । प्रतिगर इति प्रति - गरे । छन्दा॒ꣳसि । संपादयेदिति सं - पादयेत् । तेजः । प्रातस्सवन इति प्रातः - सवने । आत्मन्न् । दधीत । इन्द्रियम् । माध्यन्दिने । सवने । पशून् । तृतीयसवन इति तृतीय - सवने । इति । उक्थशा इत्युक्थ - शाः । इति । आह । प्रातस्सवनमिति प्रातः - सवनम् । प्रतिगीर्येति प्रति - गीर्य । त्रीणि । एतानि । अक्षराणि । **36 (50)**

**TS 3.2.9.3**

त्रिपदा गायत्री गायत्रं प्रातस्सवनं प्रातस्सवन एव प्रतिगरे छन्दा॒ꣳसि सं पादयत्यथो तेजो वै गायत्री तेजः प्रातः सवनं तेज एव प्रातस्सवन आत्मन् धत्त उक्थं ँवाचीत्याह माद्ध्यन्दिन॒ꣳ सवनं प्रतिगीर्य चत्वार्येतान्यक्षराणि चतुष्पदा त्रिष्टुप् त्रैष्टुभं माद्ध्यन्दिन॒ꣳ सवनं माद्ध्यन्दिन एव सवने प्रतिगरे छन्दा॒ꣳसि सं पादयत्यथो इन्द्रियं ँवै त्रिष्टुगिन्द्रियं माद्ध्यन्दिन॒ꣳ सवन - [ ] **37**

**TS 3.2.9.3 - Padam**

त्रिपदेति त्रि – पदा । गायत्री । गायत्रम् । प्रातस्सवनमिति

प्रातः – सवनम् । प्रातस्सवन इति प्रातः – सवने । एव । प्रतिगर

इति प्रति – गरे । छन्दाᳪसि । समिति । पादयति । अथो इति ।

तेजः । वै । गायत्री । तेजः । प्रातस्सवनमिति प्रातः – सवनम् ।

तेजः । एव । प्रातस्सवन इति प्रातः – सवने । आत्मन्न् । धत्ते ।

उक्थम् । वाचि । इति । आह । माद्ध्यन्दिनम् । सवनम् ।

प्रतिगीर्येति प्रति – गीर्य । चत्वारि । एतानि । अक्षराणि ।

चतुष्पदेति चतुः – पदा । त्रिष्टुप् । त्रैष्टुभम् । माद्ध्यन्दिनम् ।

सवनम् । माद्ध्यन्दिने । एव । सवने । प्रतिगर इति प्रति – गरे ।

छन्दाᳪसि । समिति । पादयति । अथो इति । इन्द्रियम् । वै ।

त्रिष्टुक् । इन्द्रियम् । माद्ध्यन्दिनम् । सवनम् । **37 (50)**

**TS 3.2.9.4**

–मिन्द्रियमेव माद्ध्यन्दिने सवन आत्मन् धत्त उक्थं ँवाचीन्द्रायेत्याह

तृतीयसवनं प्रतिगीर्य सप्तैतान्यक्षराणि सप्तपदा शक्वरी शाक्वराः

पशवो जागतं तृतीयसवनं तृतीयसवन एव प्रतिगरे छन्दाꣳसि सं पादयत्यथो पशवो वै जगती पशवस्तृतीयसवनं पशूनेव तृतीयसवन आत्मन् धत्ते यद्वै होताऽद्ध्वर्युमभ्याह्वयत आव्यमस्मिन् दधाति तद्यन्ना - [ ] **38**

**TS 3.2.9.4 - Padam**

इन्द्रियम् । एव । माद्ध्यन्दिने । सवने । आत्मन्न् । धत्ते । उक्थम् । वाचि । इन्द्राय । इति । आह । तृतीयसवनमिति तृतीय - सवनम् । प्रतिगीर्येति प्रति - गीर्य । सप्त । एतानि । अक्षराणि । सप्तपदेति सप्त - पदा । शक्वरी । शाक्वराः । पशवः । जागतम् । तृतीयसवनमिति तृतीय - सवनम् । तृतीयसवन इति तृतीय - सवने । एव । प्रतिगर इति प्रति - गरे । छन्दाꣳसि । समिति । पादयति । अथो इति । पशवः । वै । जगती । पशवः । तृतीयसवनमिति तृतीय - सवनम् । पशून् । एव । तृतीयसवन इति तृतीय - सवने । आत्मन्न् । धत्ते । यत् । वै । होता । अद्ध्वर्युम् ।

अभ्याह्वयत इत्यभि – आह्वयते । आव्यम् । अस्मिन्न् । दधाति ।

तत् । यत् । न । **38 (50)**

**TS 3.2.9.5**

पहनीत पुराऽस्य सँवथ्सराद् गृह आ वेवीरञ्छो᳚सा मोद इवेति

प्रत्याह्वयते तेनैव तदप हते यथा वा आयतां प्रतीक्षत एवमद्ध्वर्युः

प्रतिगरं प्रतीक्षते यदभि प्रतिगृणीयाद्यथा ऽऽयतया समृच्छते तादृगेव

तद्यदर्द्धर्चाल्लुप्येत यथा धावद्भ्यो हीयते तादृगेव तत् प्रबाहुग्वा

ऋत्विजामुद्गीथा उद्गीथ एवोद्गातृणा – [ ] **39**

**TS 3.2.9.5 - Padam**

अपहनीतेत्यप – हनीत । पुरा । अस्य । सँवथ्सरादिति

सं – वथ्सरात् । गृहे । एति । वेवीरन्न् । शो᳚सा । मोदः । इव ।

इति । प्रत्याह्वयत इति प्रति – आह्वयते । तेन । एव । तत् । अपेति ।

हते । यथा । वै । आयतामित्या – यताम् । प्रतीक्षत इति

प्रति – ईक्षते । एवम् । अद्ध्वर्युः । प्रतिगरमिति प्रति – गरम् ।

प्रतीति । ईक्षते । यत् । अभिप्रतिगृणीयादित्यभि – प्रतिगृणीयात् ।

यथा । आयतयेत्या – यतया । समृच्छत इति सं – ऋच्छते ।

तादृक् । एव । तत् । यत् । अर्द्धर्चादित्यर्द्ध–ऋचात् । लुप्येत ।

यथा । धावद्भ्य इति धावत् – भ्यः । हीयते । तादृक् । एव । तत् ।

प्रबाहुगिति प्र – बाहुक् । वै । ऋत्विजाम् । उद्गीथा इत्युत्–गीथाः ।

उद्गीथ इत्युत् – गीथः । एव । उद्गातृणामित्युत्–गातृणाम् । **39 (50)**

**TS 3.2.9.6**

–मृचः प्रणव उक्थशꣳसिनां प्रतिगरोऽद्ध्वर्यूणां ँय एवं ँविद्वान्

प्रतिगृणात्यन्नाद एव भवत्याऽस्य प्रजायां ँवाजी जायत इयं ँवै

होताऽसावद्ध्वर्युर्यदासीनः शꣳसत्यस्या एव तद्धोता नैत्यास्त इव

हीयमथो इमामेव तेन यजमानो दुहे यत् तिष्ठन् प्रतिगृणात्यमुष्या

एव तदद्ध्वर्युर्नैति – [ ] **40**

**TS 3.2.9.6 - Padam**

ऋचः । प्रणव इति प्र – नवः ।

उक्थशꣳसिनामित्युक्थ – शꣳसिनाम् । प्रतिगर इति प्रति – गरः ।

अद्ध्वर्यूणाम् । यः । एवम् । विद्वान् । प्रतिगृणातीति प्रति–गृणाति ।

अन्नाद इत्यन्न – अदः । एव । भवति । एति । अस्य । प्रजायामिति

प्र – जायाम् । वाजी । जायते । इयम् । वै । होता । असौ ।

अद्ध्वर्युः । यत् । आसीनः । शꣳसति । अस्याः । एव । तत् ।

होता । न । एति । आस्ते । इव । हि । इयम् । अथो इति । इमाम् ।

एव । तेन । यजमानः । दुहे । यत् । तिष्ठन्न् । प्रतिगृणातीति

प्रति – गृणाति । अमुष्याः । एव । तत् । अद्ध्वर्युः । न ।

एति । **40 (50)**

**<u>TS 3.2.9.7</u>**

तिष्ठतीव ह्यसावथो अमूमेव तेन यजमानो दुहे यदासीनः शꣳसति

तस्मादितःप्रदानं देवा उप जीवन्ति यत् तिष्ठन् प्रतिगृणाति

तस्मादमुतःप्रदानं मनुष्या उप जीवन्ति यत् प्राङासीनः शꣳसति

प्रत्यङ् तिष्ठन् प्रतिगृणाति तस्मात् प्राचीनꣳ रेतो धीयते प्रतीचीः

प्रजा जायन्ते यद्वै होताऽद्ध्वर्युमभ्याह्वयते वज्रमेनमभि प्र वर्तयति

( ) पराङा वर्तते वज्रमेव तन्नि करोति ॥ **41**

**TS 3.2.9.7 - Padam**

तिष्ठति । इव । हि । असौ । अथो इति । अमूम् । एव । तेन । यजमानः । दुहे । यत् । आसीनः । श॒ꣳसति । तस्मात् । इतःप्रदानमितीतः – प्रदानम् । देवाः । उपेति । जीवन्ति । यत् । तिष्ठन्न् । प्रतिगृणातीति प्रति – गृणाति । तस्मात् । अमुतःप्रदानमित्यमुतः – प्रदानम् । मनुष्याः । उपेति । जीवन्ति । यत् । प्राङ् । आसीनः । श॒ꣳसति । प्रत्यङ् । तिष्ठन्न् । प्रतिगृणातीति प्रति – गृणाति । तस्मात् । प्राचीनम् । रेतः । धीयते । प्रतीचीः । प्रजा इति प्र – जाः । जायन्ते । यत् । वै । होता । अद्ध्वर्युम् । अभ्याह्वयत इत्यभि – आह्वयते । वज्रम् । एनम् । अभि । प्रेति । वर्तयति ( ) । पराङ् । एति । वर्तते । वज्रम् । एव । तत् । नीति । करोति ॥ **41 (58)**

*(सवने वज्रमन्तर्धत्ते – त्रीण्येतान्यक्षराणी – न्द्रियं माध्यन्दिन॒ꣳ सवनं – नो – द्रातृणा – मध्वर्युर्नैति – वर्तयत्य – ष्टौ च) (A9)*

**TS 3.2.10.1**

उपयामगृहीतोऽसि वाक्षसदसि वाक्पाभ्यां त्वा क्रतुपाभ्यामस्य यज्ञस्य ध्रुवस्याऽद्ध्य–क्षाभ्यां गृह्णाम्युपयामगृहीतोऽस्यृतसदसि चक्षुष्पाभ्यां त्वा क्रतुपाभ्यामस्य यज्ञस्य ध्रुवस्याऽद्ध्यक्षाभ्यां गृह्णाम्युपयामगृहीतोऽसि श्रुतसदसि श्रोत्रपाभ्यां त्वा क्रतुपाभ्यामस्य यज्ञस्य ध्रुवस्याऽद्ध्यक्षाभ्यां गृह्णामि देवेभ्यस्त्वा विश्वदेवेभ्यस्त्वा विश्वेभ्यस्त्वा देवेभ्यो विष्णवुरुक्रमैष ते सोमस्तꣳ रक्षस्व – [ ] 42

**TS 3.2.10.1 - Padam**

उपयामगृहीत इत्युपयाम – गृहीतः । असि । वाक्षसदिति वाक्ष – सत् । असि । वाक्पाभ्यामिति वाक् – पाभ्याम् । त्वा । क्रतुपाभ्यामिति क्रतु – पाभ्याम् । अस्य । यज्ञस्य । ध्रुवस्य । अद्ध्यक्षाभ्यामित्यधि – अक्षाभ्याम् । गृह्णामि । उपयामगृहीत इत्युपयाम – गृहीतः । असि । ऋतसदित्यृत – सत् । असि ।

चक्षुष्पाभ्यामिति चक्षुः – पाभ्याम् । त्वा । क्रतुपाभ्यामिति

क्रतु – पाभ्याम् । अस्य । यज्ञस्य । ध्रुवस्य ।

अद्ध्यक्षाभ्यामित्यधि – अक्षाभ्याम् । गृह्णामि । उपयामगृहीत

इत्युपयाम – गृहीतः । असि । श्रुतसदिति श्रुत – सत् । असि ।

श्रोत्रपाभ्यामिति श्रोत्र – पाभ्याम् । त्वा । क्रतुपाभ्यामिति

क्रतु – पाभ्याम् । अस्य । यज्ञस्य । ध्रुवस्य ।

अद्ध्यक्षाभ्यामित्यधि – अक्षाभ्याम् । गृह्णामि । देवेभ्यः । त्वा ।

विश्वदेवेभ्य इति विश्व–देवेभ्यः । त्वा । विश्वेभ्यः । त्वा । देवेभ्यः ।

विष्णो । उरुक्रमेत्युरु – क्रम । एषः । ते । सोमः । तम् ।

रक्षस्व । **42 (50)**

**TS 3.2.10.2**

तं ते दुश्चक्षा माऽव ख्यन्मयि वसुः पुरोवसुर्वाक्पा वाचं मे पाहि

मयि वसुर्विदद्वसुश्चक्षुष्पाश्चक्षुर् मे पाहि मयि वसुः सँयद्वसुः

श्रोत्रपाः श्रोत्रं मे पाहि भूरसि श्रेष्ठो रश्मीनां प्राणपाः प्राणं

मे पाहि धूरसि श्रेष्ठो रश्मीनामपानपा अपानं मे पाहि यो न इन्द्रवायू

मित्रावरुणा–वश्विनावभिदासति भ्रातृव्य ( ) उत्पिपीते शुभस्पती

इदमहं तमधरं पादयामि यथेन्द्राऽहमुत्तमश्चेतयानि ॥ **43**

**TS 3.2.10.2 - Padam**

तम् । ते । दुश्चक्षा इति दुः – चक्षाः । मा । अवेति । ख्यत् । मयि ।

वसुः । पुरोवसुरिति पुरः – वसुः । वाक्पा इति वाक् – पाः ।

वाचम् । मे । पाहि । मयि । वसुः । विदद्वसुरिति विदत् – वसुः ।

चक्षुष्पा इति चक्षुः – पाः । चक्षुः । मे । पाहि । मयि । वसुः ।

सँयद्वसुरिति सँयत् – वसुः । श्रोत्रपा इति श्रोत्र–पाः । श्रोत्रम् ।

मे । पाहि । भूः । असि । श्रेष्ठः । रश्मीनाम् । प्राणपा इति

प्राण – पाः । प्राणमिति प्र– अनम् । मे । पाहि । धूः । असि ।

श्रेष्ठः । रश्मीनाम् । अपानपा इत्यपान – पाः ।

अपानमित्यप – अनम् । मे । पाहि । यः । नः । इन्द्रवायू

इतीन्द्र – वायू । मित्रावरुणाविति मित्रा – वरुणौ । अश्विनौ ।

अभिदासतीत्यभि – दासति । भ्रातृव्यः ( ) । उत्पिपीत

इत्युत् – पिपीते । शुभः । पती इति । इदम् । अहम् । तम् ।

अधरम् । पादयामि । यथा । इन्द्र । अहम् । उत्तम इत्युत् – तमः ।

चेतयानि ॥ **43 (63)** *(रक्षस्व – भ्रातृव्य – स्त्रयोदश च) (A10)*

**TS 3.2.11.1**

प्र सो अग्ने तवोतिभिः सुवीराभिस्तरति वाजकर्मभिः ।

यस्य त्वꣳ सख्यमाविथ ॥

प्र होत्रे पूर्व्यं ँवचोऽग्नये **भरता** बृहत् ।

विपां ज्योतीꣳषि बिभ्रते न वेधसे ॥

अग्ने त्री ते वाजिना त्री षधस्था तिस्रस्ते जिह्वा ऋतजात पूर्वीः ।

तिस्र उ ते तनुवो देववातास्ताभिर्नः पाहि गिरो अप्रयुच्छन्न् ॥

सं ँवाम् कर्मणा समिषा – [ ] **44**

**TS 3.2.11.1 - Padam**

प्रेति । सः । अग्ने । तव । ऊतिभिरित्यूति – भिः । सुवीराभिरिति

सु – वीराभिः । तरति । वाजकर्मभिरिति वाजकर्म – भिः ॥ यस्य ।

त्वम् । सख्यम् । आविथ ॥ प्रेति । होत्रे । पूर्व्यम् । वचः । अग्नये ।

भरत । बृहत् ॥ विपामिति वि – पाम् । ज्योतीꣳषि । बिभ्रते । न ।

वेधसे ॥ अग्ने । त्री । ते । वाजिना । त्री । सधस्थेति सध – स्था ।

तिस्रः । ते । जिह्वाः । ऋतजातेत्यृत – जात । पूर्वीः ॥ तिस्रः । उ । ते । तनुवः । देववाता इति देव – वाताः । ताभिः । नः । पाहि । गिरः । अप्रयुच्छन्नित्यप्र – युच्छन्न् ॥ समिति । वाम् । कर्मणा । समिति । इषा । **44 (50)**

**TS 3.2.11.2**

हिनोमीन्द्राविष्णू अपसस्पारे अस्य ।
जुषेथां ँयज्ञं द्रविणं च धत्तमरिष्टैर्नः पथिभिः पारयन्ता ॥
उभा जिग्यथुर्न परा जयेथे न परा जिग्ये कतरश्चनैनोः ।
इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं ँवि तदैरयेथां ॥
त्रीण्यायू(ँ)षि तव जातवेदस्तिस्र आजानीरुषसस्ते अग्ने ।
ताभिर्देवानामवो यक्षि विद्वानथा – [ ] **45**

**TS 3.2.11.2 - Padam**

हिनोमि । इन्द्राविष्णू इतीन्द्रा – विष्णू । अपसः । पारे । अस्य ॥ जुषेथाम् । यज्ञम् । द्रविणम् । च । धत्तम् । अरिष्टैः । नः । पथिभिरिति पथि–भिः । पारयन्ता ॥ उभा । जिग्यथुः । न । परेति ।

जयेथे इति । न । परेति । जिग्ये । कतरः । चन । एनोः ॥ इन्द्रः । च । विष्णो इति । यत् । अपस्पृधेथाम् । त्रेधा । सहस्रम् । वीति । तत् । ऐरयेथाम् ॥ त्रीणि । आयूꣳषि । तव । जातवेद इति जात – वेदः । तिस्रः । आजानीरित्या – जानीः । उषसः । ते । अग्ने । ताभिः ॥ देवानाम् । अवः । यक्षि । विद्वान् । अथ । **45 (50)**

**TS 3.2.11.3**

–भव यजमानाय शꣳ योः ॥

अग्निस्त्रीणि त्रिधातून्या क्षेति विदथा कविः ।

स त्रीꣳरेकादशाꣳ इह ॥

यक्षच्च पिप्रयच्च नो विप्रो दूतः परिष्कृतः ।

नभन्तामन्यके समे ॥

इन्द्राविष्णू दृꣳहिताः शम्बरस्य नव पुरो नवतिं च– श्नथिष्टं ।

शतं ँवर्चिनः सहस्रं च साकꣳ हथो अप्रत्यसुरस्य वीरान् ॥

उत माता महिष मन्ववेनदमी त्वा ( ) जहति पुत्र देवाः ।

अथाब्रवीद्–वृत्रमिन्द्रो हनिष्यन्थ्–सखे विष्णो वितरं ँवि क्रमस्व ॥ **46**

**TS 3.2.11.3 - Padam**

भव । यजमानाय । शम् । योः ॥ अग्निः । त्रीणि । त्रिधातूनीति

त्रि – धातूनि । एति । क्षेति । विदथा । कविः ॥ सः । त्रीन् ।

एकादशान् । इह ॥ यक्षत् । च । पिप्रयत् । च । नः । विप्रः ।

दूतः । परिष्कृतः ॥ नभन्ताम् । अन्यके । समे ॥ इन्द्राविष्णू

इतीन्द्रा–विष्णू । दृꣳहिताः । शंबरस्य । नव । पुरः । नवतिम् । च ।

श्ञथिष्टम् ॥ शतम् । वर्चिनः । सहस्रम् । च । साकम् । हथः ।

अप्रति । असुरस्य । वीरान् ॥ उत । माता । महिषम् । अन्विति ।

अवेनत् । अमी इति । त्वा ( ) । जहति । पुत्र । देवाः ॥ अथ ।

अब्रवीत् । वृत्रम् । इन्द्रः । हनिष्यन्न् । सखे । विष्णो इति ।

वितरमिति वि – तरम् । वीति । क्रमस्व ॥ **46 (63)**

***(इ॒षा – ऽथ – त्वा – त्रयोदश च) (A11)***

===================

**Prasna Korvai with starting Padams of 1 to 11 Anuvaakams :-**

(यो वै पवमानानां – त्रीणि – परिभूः – स्फ्यः स्वस्ति – भक्षेहि – महीनां पयोऽसि – देव सवितरेतत्ते – श्येनाय – यद्वै होतो – पयामगृहीतोऽसि वाक्षसत् – प्र सो अग्न – एकादश )

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(यो वै – स्फ्यः स्वस्तिः – स्वधायै नमः – प्रमुञ्च – तिष्ठतीव – षट्चत्वारिꣳशत् )

**First and Last Padam of Second Prasnam of Kandam 3:-**

(यो वै पवमानानां – विक्रमस्व)

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे

तृतीयकाण्डे द्वितीयः प्रश्नः समाप्तः ॥

---

**Details of Panchati and Padam for Kandam 3 , Prasanam 2 – (TS 3.2)**

| | Panchati | Padams |
|---|---|---|
| Anuvakam 1 | 3 | 142 |
| Anuvakam 2 | 3 | 153 |
| Anuvakam 3 | 4 | 195 |
| Anuvakam 4 | 5 | 233 |
| Anuvakam 5 | 7 | 344 |
| Anuvakam 6 | 3 | 172 |
| Anuvakam 7 | 3 | 172 |
| Anuvakam 8 | 6 | 290 |
| Anuvakam 9 | 7 | 358 |
| Anuvakam 10 | 2 | 113 |
| Anuvakam 11 | 3 | 163 |
| Total → | 46 | 2335 |

**Notes:**

- **Please refer to the book “TS Kandam 1” and “TS 1.1 pada paadam with Vaakyam” for notes and conventions used in this Compilation.**
- **Please download our vedic compilations from our web site www.vedavms.in**